# पाठ -५
# अतिलोभः न कर्तव्यः

**सारान्शः**

चत्वारि मित्राणि निर्धनाः आसन् । एकः योगी तेभ्यः सिद्धवर्त्तिकाः अयच्छत्। अकथयत् च वर्त्तिकायाः पतनस्थाने धनं भविष्यति । यदा प्रथमा वर्त्तिका अपतत् तत्र ताम्रमयी भूमिः आसीत्। तेषु एकः ताम्रं गृहीत्वा सन्तुष्टः भूत्वा गृहं प्रति अगच्छत् । अवशिष्टेषु द्वितीयः जनः रजतम् आप्नोति, सः अपि तत् आदाय गच्छति । एवं तृतीयः स्वर्णम् आदाय प्रतिनिवर्तते । परन्तु चतुर्थः तदापि न सन्तुष्टः । सः अग्रे गच्छति। सः एकं चक्रधरं जनं पश्यति । तं च जलविषये पृच्छति। तस्मिन्नेव क्षणे चक्रम् अवतीर्य तस्य मस्तकम् आरोहति । यः अतिलोभम् करोति तस्य मस्तके चक्रम् एव भ्रमति । वस्तुतः अति लोभात् विनाशः भवति।

**मुख्य बिन्दवः**

एषा कथा पंचतन्त्रात् संकलिता। पंचतन्त्रस्य रचयिता पं० विष्णुशर्मा अस्ति। सः विष्णुशर्मा राज्ञः पुत्राणां बोधाय एताः कथाः अश्रावयत्। एताः कथाः श्रुत्वा राजपुत्राः राजनीतिकुशलाः व्यवहारचतुराः च अभवन् । अस्मिन् ग्रंथे पञ्च भागाः सन्ति 1. मित्रभेदः, 2. मित्रसम्प्राप्तिः, 3. काकोलूकीयम्, 4. लब्धप्रणाशः, 5. अपरीक्षितकारकं च। अस्य ग्रन्थस्य अरबी-फारसीभाषयोः अनुवादः कृतः अस्ति। आंग्लभाषायाम् 'एरेबियन् नाइट्स' इति अस्य एव अनुवादः ।

**अवगच्छामः**

"लोभो मूलमनर्थानाम् यद्यपि लोभवशात् जनाः कार्यशीलाः भवन्ति परंतु यदा अतिलोभः भवति तदा जनाः दुष्टानि कर्माणि कुर्वन्ति, चौर्यं कुर्वन्ति, हत्यां कुर्वन्ति अतिलोभस्य सीमा नास्ति । मृगतृष्णावत् अतिलोभः अधिकाधिकं वर्धते। अन्ते मनुष्यः पूर्णतया नष्टः भवति।

**आवश्यकोऽयं ज्ञानम्**

लोभः प्रतिष्ठा पापस्य प्रसूतिर्लोभ एव च
द्वेषक्रोधादिजनको लोभः पापस्य कारणम्
(भोजप्रबधः) ।
लोभश्चेदगुणेन किम्? (भर्तृहरिः) ।
लोभेन बुद्धिश्चलति, लोभो जनयते तृषाम् ।
तृषार्तो दुःखमाप्नोति, परत्रेह च मानवः ।।
(हितोपदेशः / मित्रलाभः / 140) ।
धने लोभे जन्तोः स्थितिमुपगते कस्य सुगतिः ।
(दशावतारचरितम् 6.20) ।
कासां हि नापदां हेतुरतिलोभान्धबुद्धिता।
(कथासरित्सागरम् 5.1.20) ।
प्रभूतलोभलुब्धानां मूलस्यापि परिक्षयः।
(समयमातृका, 78) ।
लोभविष्टो नरो वित्तं वीक्षते न स चापदम् ।
दुग्धं पश्यति मार्जारो, न तथा लगुडाहतिम् ।।
(सुभाषितरत्नभाण्डागारम्) ।

**व्याकरण बिन्दवः शब्द भण्डाराश्च**

- क्त्वा / ल्यप् प्रयोगः धातोः पूर्वं यदि उपसर्गः भवति तदा क्त्वा स्थाने ल्यप् भवति । यथा - अवतीर्य - अव + तृ + ल्यप् ।
- उत्तर पद प्रधानः तत्पुरुषः - यथा राजपुरुषः ।
- संस्कृतभाषायां त्रीणि लिङ्गानि भवन्ति । दश लकाराः त्रयः पुरुषाः, त्रीणि वचनानि च भवन्ति।

**शब्दार्थाः**

| | |
|---|---|
| धनोपार्जनाय | धन कमाने के लिए |
| अतिसाहसिकाः | बहुत साहसी |
| सिद्धवर्तिकाः | मन्त्र से सिद्ध बत्तियाँ |
| निस्सरति | निकलता है |
| रूप्यमयीं | चांदी की |
| पिपासाकुलः | प्यास से व्याकुल |
| रुधिरप्लावितं | खून से सने हुए |
| उपसृत्य | पास जाकर |

**योग्यतां वर्धयत**

लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।
तृषार्तो दुःखमाप्नोति परत्रेह च मानवः ॥

लोभात्क्रोधः प्रभवति लोभात्कामः प्रजायते ।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥

यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ते अध्रुवं नष्टमेव हि ।।

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्।।

**पाठ संप्रेष्यः**

- अस्माभिः कदापि लोभः न कर्तव्यः ।
- अतिलोभः अनर्थकारकः भवति ।
  अतिलोभस्य परिणामः विनाशः एव ।
- सन्तोषः एव पुरुषस्य परमं निधानम् ।
- धातोः पूर्वम् यदि उपसर्गः भवति तदा क्त्वा स्थाने ल्यप् भवति।
- तत्पुरुषसमासे द्वितीयं पदं प्रधानं भवति ।
- विशेषणानां प्रयोगः विशेष्यवत् भवति ।
- संख्यापदानि अपि विशेषणानि भवन्ति।
- भूतकाले कर्तृवाच्ये लङ्लकारस्य स्थाने क्तवतु प्रत्ययस्य प्रयोगः भवति।

**अधिकाङ्कानाम् अर्जनं कथं भवेत्**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात्।
- अध्यायस्य समनार्थी पद्य सूक्तयः अपि जानीयात्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- प्रत्यय, तत्पुरुष समास, विशेषण विशेष्याणां प्रयोगेण अभ्यासं कुरुत।
- लोभ इति विषयं आधृत्य लघु लेखं लिखत।